# Munayah Krita Shiva Stuti

# મુનયઃ કૃતા શિવસ્તુતિઃ

## Document Information

Text title : Munayah Krita Shiva Stuti

File name : munayaHkRRitAshivastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 24 | 83-89 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 31, 2024

*sanskritdocuments.org*

# મુનયઃ કૃતા શિવસ્તુતિઃ

મહાદેવ દેવાદિદેવાદિદેવ પ્રસીદ પ્રસીદ પ્રસીદ પ્રસીદ ।
પ્રસીદ પ્રસીદ પ્રસીદ પ્રસીદ પ્રસીદ પ્રભો ચન્દ્રમૌલે પ્રસીદ ॥ ૮૩॥

અનાથૈકનાથસ્ત્વમેકો મહેશ સ્મરારે પુરસ્તાદધસ્તાચ્ચ પશ્ચાત્ ।
ત્વમેવાસિ પાર્શ્વેઽપિ પશ્ય પ્રસીદ સ્મરન્તં ભવન્તં કૃતાન્તાન્તકં ત્વામ્ ॥ ૮૪॥

ભવન્તં વિનાન્યં ન જાને ન જાને મતિસ્ત્વં ગતિસ્ત્વં પતિસ્ત્વં મહેશ ।
પિતાપિ ત્વમેવેન્દુમૌલેકમીડે ભવન્તં વિના કોઽપિ નેઽન્યોઽપિ લોકે ॥ ૮૫॥

મદઙ્ગં ચ તુઙ્ગેન લિઙ્ગેન સઙ્ગં ભવન્તં પરં પ્રાપ્તુમેવેતિ મન્યે ।
ઇદં બિલ્વપત્રાવૃતં લિઙ્ગમીશ સમસ્તાર્થદાનોદ્યતં સર્વદાપિ ॥ ૮૬॥

પ્રપશ્યામિ તુઙ્ગાનિ લિઙ્ગાન્યભઙ્ગાન્યપારાણિ તદ્દર્શનેનૈવ મુક્તિઃ ।
ભવિત્રી મમેશાન નૂનં ન યાચે ન યાચે ન ચાન્યત્ર વાઞ્છા કુતઃ સ્યાત્ ॥ ૮૭॥

ન ચેન્દ્રાદિલોકેષુ વાઞ્છા મહેશ સ્મરારે ભવત્પાદપદ્મે શપામિ ।
નિધિં પ્રાપ્ય કો વા મુહુઃ કાચખણ્ડં સ્વતુણ્ડેન ગૃહ્ણાતિ ચણ્ડાલવૃત્તિઃ ॥ ૮૮॥

દૃઢા ભક્તિરીશાનપાદારવિન્દે મમાસ્ત્વસ્તુ નિત્યં મમાસ્ત્વસ્તુ સા મે ।
સમર્થા હિ ધર્માર્થકામપ્રદાને તથા મોક્ષદાને સમર્થા મહેશ ॥ ૮૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે મુનયઃ કૃતા શિવસ્તુતિઃ સમ્પૂર્ણા સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૨૪। ૮૩-૮૯ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 24. 83-89 ..

Proofread by Ruma Dewan

*Munayah Krita Shiva Stuti*

pdf was typeset on January 31, 2024

Please send corrections to *sanskrit@cheerful.com*